Roll No. ..........................

Total No. of Pages : 3

Total No. of Questions : 10

# पूर्वमध्यमा द्वितीयखण्ड

## विषय कोड : 614

## साहित्यम्

## चतुर्थ प्रश्नपत्र

समय : 3 घण्टे

पूर्णांक : 100

1. उचितं विकल्पं चित्वा लिखत— 10

(क) "चन्द्रलोक:" कस्य कवे: रचना अस्ति ?

(ख) दिलीपस्य कस्य पुत्र: अस्ति ?

(ग) करुण रसस्य स्थायी भाव: अस्ति

(घ) महर्षे: कामधेनु: नाम आसीत्

(ङ) रघुवंशस्य कति सर्गा: सन्ति

2. रिक्तस्थानानि पूरयन्तु— 10

(क) जयदेवस्य मते गुणानां संख्या .............................. सन्ति ।

(ख) उपमा .............................. भारवेऽर्थगौरवम् ।

(ग) उपमानोपमेयत्वे .............................. जाग्रत: ।

(घ) वाक्यं रसात्मकं .............................. ।

(ङ) असमर्थ दोषविमर्श: .............................. मयूखे वर्णनमस्ति ।

3. सत्यकथनानां समक्षे 'आम' असत्य कथनानां समक्षे 'न' इति लिखत : 5

(क) रघुवंशम् खण्डकाव्यम् अस्ति ।

(ख) चन्द्रालोक रचना मयूखेषु अस्ति ।

(ग) रसानाम् संख्या दश आसीत् ।

(घ) दिलीपस्य पत्नी सुदक्षिणा आसीत् ।

(ङ) जयदेवस्य रचना चन्द्रालोक: अस्ति ।

4. युग्ममेलनं कुरुत — 5

| | |
|---|---|
| (क) रघुवंशम् | होमधेनु: |
| (ख) दोषविवेचनम् | दशमयूखा: |
| (ग) नन्दिनी | अलंकार: |
| (घ) चन्द्रालोके | कालिदासस्य |
| (ङ) अलंकरोतीति | द्वितीयमयूखे |

5. रघुवंशम् द्वितीय सर्गस्य किमपि एकं श्लोकं लिखत । 10

**अथवा**

चन्द्रालोकग्रन्थस्य मंगलश्लोकं लिखत ।

6. **एक**वाक्येन उत्तरं लिखत— 10

(क) जयदेवस्य मातु: नाम् किम् ?

(ख) दिलीपस्य पुत्रस्य नाम किम्ऽस्ति ?

(ग) जयदेवस्य मते कति गुणानां सन्ति ?

(घ) रघुवंशम् कीदृशं काव्यम् ?

(ङ) शब्दलक्षणविचार: कस्मिन् मयूखेऽस्ति ?

7. अधोलिखितेषु कयोः **द्वयोः** श्लोकयोः संस्कृतेन व्याख्या लेख्या— 20

(क) शशाम वृष्टयापि विना दवाग्निरासीद् विशेषाफलपुष्पवृद्धिः ।

ऊनं न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने ॥

(ख) ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।

जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारि ॥

(ग) प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।

प्रणस्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥

8. चन्द्रालोकस्य परिचयः देयः । 10

9. अधोलिखितेषु कयोः **द्वयोः** अलंकारयोः सोदाहरणं निरूपणं कुरुत— 10

(क) उपमा

(ख) रूपक

(ग) विभावना

(घ) उत्प्रेक्षा ।

10. लघुत्तरीया प्रश्नाः केचन पञ्च लेखनीया— 10

(क) शब्दः कः इष्यते ?

(ख) जयदेवः काव्यं कीदृशं स्वीकरोति ।

(ग) तृतीये मयूखे के विषयाः निरूपिताः सन्ति ।

(घ) चन्द्रालोकस्य मङ्गलश्लोके कयोः वन्दना कृताऽस्ति ।

(ङ) चन्द्रालोकस्य पूर्वार्द्धे काः निरूपिताः सन्ति ।

(च) रघुवंशस्य द्वितीय सर्गे कति श्लोकाः सन्ति ।